# Natya Shastra Chapter 18

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૮

## Document Information

Text title : naaTyashaastra adhyaaya 18 dasharuupaniruupaNaM

File name : natya18.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com are needed for devanaagarii output and formatting.

Latest update : November 22, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૮

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ અષ્ટાદશોઽધ્યાયઃ

વર્ત્તયિષ્યામ્યહં વિપ્રા દશરૂપવિકલ્પનમ્ ।
નામતઃ કર્મતશ્ચૈવ તથા ચૈવ પ્રયોગતઃ ॥ ૧॥

નાટકં સપ્રકરણમઙ્કો વ્યાયોગ એવ ચ ।
ભાણઃ સમવકારશ્ચ વીથી પ્રહસનં ડિમઃ ॥ ૨॥

ઈહામૃગશ્ચ વિજ્ઞેયા દશેમે નાટ્યલક્ષણે ।
એતેષાં લક્ષણમહં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ॥ ૩॥

સર્વેષામેવ કાવ્યાનાં માતૃકા વૃત્તયઃ સ્મૃતાઃ ।
આભ્યો વિનિસૃતં હ્યેતદ્દશરૂપં પ્રયોગતઃ ॥ ૪॥

જાતિભિઃ શ્રુતિભિશ્ચૈવ સ્વરા ગ્રામત્વમાગતાઃ ।
યથા તથા વૃત્તિભેદૈઃ કાવ્યબન્ધા ભવન્તિ હિ ॥ ૫॥

ગ્રામૌ પૂર્ણસ્વરૌ દ્વૌ તુ યથા વૈ ષડ્જમધ્યમૌ ।
સર્વવૃત્તિવિનિષ્પન્નૌ કાવ્યબન્ધૌ તથા ત્વિમૌ ॥ ૬॥

જ્ઞેયં પ્રકરણં ચૈવ તથા નાટકમેવ ચ ।
સર્વવૃત્તિવિનિષ્પન્નં નાનાબન્ધસમાશ્રયમ્ ॥ ૭॥

વીથી સમવકારશ્ચ તથેહામૃગ એવ ચ ।
ઉત્સૃષ્ટિકાઙ્કો વ્યાયોગો ભાણઃ પ્રહસનં ડિમઃ ॥ ૮॥

કૈશિકીવૃત્તિહીનાનિ રૂપાણ્યેતાનિ કારયેત્ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ કાવ્યબન્ધવિકલ્પનમ્ ॥ ૯॥

પ્રખ્યાતવસ્તુવિષયં પ્રખ્યાતોદાત્તનાયકં ચૈવ ।

રાજર્ષિવંશ્યચરિતં તથૈવ દિવ્યાશ્રયોપેતમ્ ॥ ૧૦॥

નાનાવિભૂતિભિર્યુતમૃદ્ધિવિલાસાદિભિર્ગુણૈશ્ચૈવ ।
અઙ્કપ્રવેશકાઢ્યં ભવતિ હિ તન્નાટકં નામ ॥ ૧૧॥

નૃપતીનાં યચ્ચરિતં નાનારસભાવચેષ્ટિતં બહુધા ।
સુખદુઃખોત્પત્તિકૃતં ભવતિ હિ તન્નાટકં નામ ॥ ૧૨॥

અસ્યાવસ્થોપેતં કાર્યં પ્રસમીક્ષ્ય બિન્દુવિસ્તારાત્ ।
કર્તવ્યોઽઙ્કઃ સોઽપિ તુ ગુણાન્વિતં નાટ્યતત્ત્વજ્ઞૈઃ ॥ ૧૩॥

અઙ્ક ઇતિ રૂઢિશબ્દો ભાવૈશ્ચ રસૈશ્ચ રોહયત્યર્થાન્ ।
નાનાવિધાનયુક્તો યસ્માત્તસ્માદ્ભવેદઙ્કઃ ॥ ૧૪॥

અઙ્કસમાપ્તિઃ કાર્યા કાવ્યચ્છેદેન બીજસંહારઃ ।
વસ્તુવ્યાપી બિન્દુઃ કાવ્યસમુત્થોઽત્ર નિત્યં સ્યાત્ ॥ ૧૫॥

યત્રાર્થસ્ય સમાપ્તિર્યત્ર ચ બીજસ્ય ભવતિ સંહારઃ ।
કિઞ્ચિદવલગ્નબિન્દુઃ સોઽઙ્ક ઇતિ સદાવગન્તવ્યઃ ॥ ૧૬॥

યે નાયકા નિગદિતાસ્તેષાં પ્રત્યક્ષચરિતસંયોગઃ ।
નાનાવસ્થોપેતઃ કાર્યસ્ત્વઙ્કોઽવિપ્રકૃષ્ટસ્તુ ॥ ૧૭॥

નાયકદેવીગુરુજનપુરોહિતામાત્યસાર્થવાહાનામ્ ।
નૈકરસાન્તરવિહિતો હ્યઙ્ક ઇતિ સ વેદિતવ્યસ્તુ ॥ ૧૮॥

પઞ્ચાક્ષરા દશપરા હ્યઙ્કાઃ સ્યુર્નાટકે પ્રકરણે ચ ।
નિષ્ક્રામઃ સર્વેષાં યસ્મિન્નઙ્કઃ સ વિજ્ઞેયઃ ॥ ૧૯॥

ક્રોધપ્રસાદશોકાઃ શાપોત્સર્ગોઽથ વિદ્રવોદ્વાહૌ ।
અદ્ભુતસમ્ભવદર્શનમઙ્કે પ્રત્યક્ષજાનિ સ્યુઃ ॥ ૨૦॥

એકદિવસપ્રવૃત્તઃ કાર્યસ્ત્વઙ્કોઽર્થબીજમધિકૃત્ય ।
આવશ્યકકાર્યાણામવિરોધેન પ્રયોગેષુ ॥ ૨૧॥

એકાઙ્કેન કદાચિદ્બહૂનિ કાર્યાણિ યોજયેદ્ધીમાન્ ।
આવશ્યકાવિરોધેન તત્ર કાવ્યાનિ કાર્યાણિ ॥ ૨૨॥

રઙ્ગં તુ યે પ્રવિષ્ટાઃ સર્વેષાં ભવતિ તત્ર નિષ્ક્રામઃ ।
બીજાર્થયુક્તિયુક્તં કૃત્વા કાવ્યં યથાર્થરસમ્ ॥ ૨૩॥

ન બહૂનીહ કાર્યાણિ ત્વેકાઙ્કે વિનિયોજયેત્ ।
આવશ્યકાનાં કાર્યાણાં વિરોધો હિ તથા ભવેત્ ॥ ૨૪॥

જ્ઞાત્વા દિવસાવસ્થાં ક્ષણયામમુહૂર્તલક્ષણોપેતામ્ ।
વિભજેત્સર્વમશેષં પૃથક્પૃથક્કાવ્યમઙ્કેષુ ॥ ૨૫॥

દિવસાવસાનકાર્યં યદ્યઙ્કે નોપપદ્યતે સર્વમ્ ।
અઙ્કચ્છેદં કૃત્વા પ્રવેશકૈસ્તદ્વિધાતવ્યમ્ ॥ ૨૬॥

વિપ્રકૃષ્ટં તુ યો દેશં ગચ્છેત્કાર્યવશાનુગઃ ।
અઙ્કચ્છેદેઽથ સંક્ષેપાન્નિર્દિશેત્તં પ્રવેશકૈઃ ॥ ૨૭॥

સન્નિહિતનાયકોઽઙ્કઃ કર્તવ્યો નાટકે પ્રકરણે વા ।
પરિજનકથાનુબન્ધઃ પ્રવેશકો નામ વિજ્ઞેયઃ ॥ ૨૮॥

પ્રકરણનાટકવિષયે પઞ્ચાદ્યા દશપરા ભવન્ત્યઙ્કાઃ ।
અઙ્કાન્તરસન્ધિષુ ચ પ્રવેશકાસ્તેષુ તાવન્તઃ ॥ ૨૯॥

અનયોરન્તરવિહિતઃ પ્રવેશકોઽર્થક્રિયાં સમભિવીક્ષ્ય ।
સંક્ષેપાર્થઃ સન્ધિષ્વર્થાનાં સંવિધાતવ્યઃ ॥ ૩૦॥

અઙ્કચ્છેદં કૃત્વા માસકૃતં વર્ષસઞ્ચિતં વાપિ ।
તત્સર્વં કર્તવ્યં વર્ષાદૂર્ધ્વં ન તુ કદાચિત્ ॥ ૩૧॥

યઃ કશ્ચિત્કાર્યવશાદ્ગચ્છતિ પુરુષઃ પ્રકૃષ્ટમધ્વાનમ્ ।
તત્રાપ્યઙ્કચ્છેદઃ કર્તવ્યઃ પૂર્વવત્તજ્ઞૈઃ ॥ ૩૨॥

અઙ્કાન્તરાનુસારી સંક્ષેપાર્થમધિકૃત્ય બિન્દૂનામ્ ।
પ્રકરણનાટકવિષયે પ્રવેશકઃ સંવિધાતવ્યઃ ॥ ૩૩॥

નોત્તમમધ્યમપુરુષૈરાચરિતો નાપ્યુદાત્તવચનકૃતઃ ।
પ્રાકૃતભાષાચારઃ પ્રયોગમાશ્રિત્ય કર્તવ્યઃ ॥ ૩૪॥

કાલોત્થાનગતિરસૌ વ્યાખ્યાસંરમ્ભકાર્યવિષયાણામ્ ।
અર્થાભિધાનયુક્તઃ પ્રવેશકઃ સ્યાદનેકાર્થઃ ॥ ૩૫॥

બહ્વાશ્રયમપિ કાર્યં પ્રવેશકૈઃ સંક્ષિપેચ્ચ સન્ધિષુ વા ।
બહુચૂર્ણપદૈર્યુક્તં જનયતિ ખેદં પ્રયોગસ્ય ॥ ૩૬॥

યત્રાર્થસ્ય સમાપ્તિર્ન ભવત્યઙ્કે પ્રયોગબાહુલ્યાત્ ।
વૃત્તાન્તસ્વલ્પકથૈઃ પ્રવેશકૈઃ સોઽભિધાતવ્યઃ ॥ ૩૭॥

યુદ્ધં રાજ્યભ્રંશો મરણં નગરોપરોધનં ચૈવ ।
પ્રત્યક્ષાણિ તુ નાઙ્કે પ્રવેશકૈઃ સંવિધેયાનિ ॥ ૩૮॥

અઙ્કે પ્રવેશકે ચ પ્રકરણમાશ્રિત્ય નાટકે વાપિ ।
ન વધઃ કર્તવ્યઃ સ્યાદ્યોઽભ્યુદયી નાયકઃ ખ્યાતઃ ॥ ૩૯॥

અપસરણમેવ કાર્યં ગ્રહણં વા સન્ધિરેવ વા યોજ્યઃ ।
કાવ્યશ્લેષૈર્બહુભિર્યથારસં નાટ્યતત્ત્વજ્ઞૈઃ ॥ ૪૦॥

ન મહાજનપરિવારં કર્તવ્યં નાટકં પ્રકરણં વા ।
યે તત્ર કાર્યપુરુષાશ્ચત્વારઃ પઞ્ચ વા તે સ્યુઃ ॥ ૪૧॥

કાર્યં ગોપુચ્છાગ્રં કર્તવ્યં કાવ્યબન્ધમાસાદ્ય ।
યે ચોદાત્તા ભાવાસ્તે સર્વે પૃષ્ઠતઃ કાર્યાઃ ॥ ૪૨॥

સર્વેષાં કાવ્યાનાં નાનારસભાવયુક્તિયુક્તાનામ્ ।
નિર્વહણે કર્તવ્યો નિત્યં હિ રસોઽદ્ભુતસ્તજ્જ્ઞૈઃ ॥ ૪૩॥

નાટકલક્ષણમેતન્મયા સમાસેન કીર્તિતં વિધિવત્ ।
પ્રકરણમતઃ પરમહં લક્ષણયુક્ત્યા પ્રવક્ષ્યામિ ॥ ૪૪॥

યત્ર કવિરાત્મશક્ત્યા વસ્તુ શરીરં ચ નાયકં ચૈવ ।
ઔત્પત્તિકં પ્રકુરુતે પ્રકરણમિતિ તદ્બુધૈર્જ્ઞેયમ્ ॥ ૪૫॥

યદનાર્ષમથાહાર્યં કાવ્યં પ્રકરોત્યભૂતગુણયુક્તમ્ ।
ઉત્પન્નબીજવસ્તુ પ્રકરણમિતિ તદપિ વિજ્ઞેયમ્ ॥ ૪૬॥

યન્નાટકે મયોક્તં વસ્તુ શરીરં ચ વૃત્તિભેદાશ્ચ ।
તત્પ્રકરણેઽપિ યોજ્યં સલક્ષણં સર્વસન્ધિષુ તુ ॥ ૪૭॥

વિપ્રવણિક્સચિવાનાં પુરોહિતામાત્યસાર્થવાહાનામ્ ।
ચરિતં યન્નૈકવિધં જ્ઞેયં તત્પ્રકરણં નામ ॥ ૪૮॥

નોદાત્તનાયકકૃતં ન દિવ્યચરિતં ન રાજસમ્ભોગમ્ ।
બાહ્યજનસમ્પ્રયુક્તં તજ્જ્ઞેયં પ્રકરણં તજ્જ્ઞૈઃ ॥ ૪૯॥

દાસવિટશ્રેષ્ઠિયુતં વેશસ્ત્ર્યુપચારકારણોપેતમ્ ।
મન્દકુલસ્ત્રીચરિતં કાવ્યં કાર્યં પ્રકરણે તુ ॥ ૫૦॥

સચિવશ્રેષ્ઠિબ્રાહ્મણપુરોહિતામાત્યસાર્થવાહાનામ્ ।

ગૃહવાર્તા યત્ર ભવેન્ન તત્ર વેશ્યાઙ્ગના કાર્યા ॥ ૫૧॥

યદિ વેશયુવતિયુક્તં ન કુલસ્ત્રી સઙ્ગમોઽપિ સ્યાત્ ।
અથ કુલજનપ્રયુક્તં ન વેશયુવતિર્ભવેત્તત્ર ॥ ૫૨॥

યદિ વા કારણયુક્ત્યા વેશકુલસ્ત્રીકૃતોપચારઃ સ્યાત્ ।
અવિકૃતભાષાચારં તત્ર તુ પાઠ્યં પ્રયોક્તવ્યમ્ ॥ ૫૩॥

મધ્યમપુરુષૈર્નિત્યં યોજ્યો વિષ્કમ્ભકોઽત્ર તત્ત્વજ્ઞૈઃ ।
સંસ્કૃતવચનાનુગતઃ સંક્ષેપાર્થઃ પ્રવેશકવત્ ॥ ૫૪॥

શુદ્ધઃ સંકીર્ણો વા દ્વિવિધો વિષ્કમ્ભકોઽપિ કર્તવ્યઃ ।
મધ્યમપાત્રઃ શુદ્ધઃ સંકીર્ણો નીચમધ્યકૃતઃ ॥ ૫૫॥

અઙ્કાન્તરાલવિહિતઃ પ્રવેશકોઽર્થક્રિયાં સમભિવીક્ષ્ય ।
સંક્ષેપાત્સન્ધીનામર્થાનાં ચૈવ કર્તવ્યઃ ॥ ૫૬॥

અનયોશ્ચ બન્ધયોગાદન્યો ભેદઃ પ્રયોક્તૃભિઃ કાર્યઃ ।
પ્રખ્યાતસ્ત્વિતરો વા નાટકયોગે પ્રકરણે વા ॥ ૫૭॥

પ્રકરણનાટકભેદાદુત્પાદ્યં વસ્તુ નાયકં નૃપતિમ્ ।
અન્તઃપુરસઙ્ગીતકકન્યામધિકૃત્ય કર્તવ્યા ॥ ૫૮॥

સ્ત્રીપ્રાયા ચતુરઙ્કા લલિતાભિનયાત્મિકા સુવિહિતાઙ્ગી ।
બહુનૃત્તગીતપાઠ્યા રતિસમ્ભોગાત્મિકા ચૈવ ॥ ૫૯॥

રાજોપચારયુક્તા પ્રસાદનક્રોધદમ્ભસંયુક્તા ।
નાયકદેવીદૂતી સપરિજના નાટિકા જ્ઞેયા ॥ ૬૦॥

અન્તર્ભાવગતા હ્યેષા ભાવયોરુભયોર્યતઃ ।
અત એવ દશૈતાનિ રૂપાણીત્યુદિતાનિ વૈ ॥ ૬૧॥

પ્રકરણનાટકલક્ષણમુક્તં વિપ્રા મયા સમાસેન ।
વક્ષ્યામ્યતઃ પરમહં લક્ષણં યુક્ત્યા સમવકારમ્ ॥ ૬૨॥

દેવાસુરબીજકૃતઃ પ્રખ્યાતોદાત્તનાયકશ્ચૈવ ।
ત્ર્યઙ્કસ્તથા ત્રિકપટસ્ત્રિવિદ્રવઃ સ્યાત્ત્રિશ‍ૃઙ્ગારઃ ॥ ૬૩॥

દ્વાદશનાયકબહુલો હ્યષ્ટાદશનાડિકાપ્રમાણશ્ચ ।
વક્ષ્યામ્યસ્યાઙ્કવિધિં યાવત્યો નાડિકા યત્ર ॥ ૬૪॥

અઙ્કસ્તુ સપ્રહસનઃ સવિદ્રવઃ સકપટઃ સવીથીકઃ ।
દ્વાદશનાડીવિહિતઃ પ્રથમઃ કાર્યઃ ક્રિયોપેતઃ ॥ ૬૫॥

કાર્યસ્તથા દ્વિતીયઃ સમાશ્રિતો નાડિકાશ્ચતસ્રસ્તુ ।
વસ્તુસમાપનવિહિતો દ્વિનાડિકઃ સ્યાત્તૃતીયસ્તુ ॥ ૬૬॥

નાડીસંજ્ઞા જ્ઞેયા માનં કાલસ્ય યન્મુહૂર્તાર્ધમ્ ।
તન્નાડિકાપ્રમાણં યથોક્તમઙ્કેષુ સંયોજ્યમ્ ॥ ૬૭॥

યા નાડિકેતિ સંજ્ઞા કાલવિભાગે ક્રિયાભિસમ્પન્ના ।
કાર્યા ચ સા પ્રયત્નાદ્યથા ક્રમેણૈવ શાસ્ત્રોક્તા ॥ ૬૮॥

અઙ્કોઽઙ્કસ્ત્વન્યાર્થઃ કર્તવ્યઃ કાવ્યબન્ધમાસાદ્ય ।
અર્થં હિ સમવકારે હ્યપ્રતિસમ્બન્ધમિચ્છન્તિ ॥ ૬૯॥

યુદ્ધજલસમ્ભવો વા વાય્વગ્નિગજેન્દ્રસંભ્રમકૃતો વા ।
નગરોપરોધજો વા વિજ્ઞેયો વિદ્રવસ્ત્રિવિધઃ ॥ ૭૦॥

વસ્તુગતક્રમવિહિતો દૈવવશાદ્વા પરપ્રયુક્તો વા ।
સુખદુઃખોત્પત્તિકૃતસ્ત્રિવિધઃ કપટોઽત્ર વિજ્ઞેયઃ ॥ ૭૧॥

ત્રિવિધશ્ચાત્ર વિધિજ્ઞૈઃ પૃથક્પૃથક્કાર્યવિહિતાર્થઃ ।
શ◌ૃઙ્ગારઃ કર્તવ્યો ધર્મે ચાર્થે ચ કામે ચ ॥ ૭૨॥

યસ્મિન્ ધર્મપ્રાપકમાત્મહિતં ભવતિ સાધનં બહુધા ।
વ્રતનિયમતપોયુક્તો જ્ઞેયોઽસૌ ધર્મશ◌ૃઙ્ગારઃ ॥ ૭૩॥

અર્થસ્યેચ્છાયોગાદ્બહુધા ચૈવાર્થતોઽર્થશ◌ૃઙ્ગારઃ ।
સ્ત્રીસમ્પ્રયોગવિષયેષ્વર્થાર્થા વા રતિર્યત્ર ॥ ૭૪॥

કન્યાવિલોભનકૃતં પ્રાપ્તૌ સ્ત્રીપુંસયોસ્તુ રમ્યં વા ।
નિભૃતં સાવેગં વા યસ્ય ભવેત્કામશ◌ૃઙ્ગારઃ ॥ ૭૫॥

ઉષ્ણિગ્ગાયત્ર્યાદીન્યન્યાનિ ચ યાનિ બન્ધકુટિલાનિ ।
વૃત્તાનિ સમવકારે કવિભિસ્તાનિ પ્રયોજ્યાનિ ॥ ૭૬॥

એવં કાર્યસ્તજ્જ્ઞૈર્નાનારસસંશ્રયઃ સમવકારઃ ।
વક્ષ્યામ્યતઃ પરમહં લક્ષણમીહામૃગસ્યાપિ ॥ ૭૭॥

દિવ્યાપુરુષાશ્રયકૃતો દિવ્યસ્ત્રીકારણોપગતયુદ્ધઃ ।
સુવિહિતવસ્તુનિબદ્ધો વિપ્રત્યયકારકશ્ચૈવ ॥ ૭૮॥

ઉદ્ધતપુરુષપ્રાયઃ સ્ત્રીરોષગ્રથિતકાવ્યબન્ધશ્ચ ।
સંક્ષોભવિદ્રવકૃતઃ સમ્ફેટકૃતસ્તથા ચૈવ ॥ ૭૯॥

સ્ત્રીભેદનાપહરણાવમર્દનપ્રાપ્તવસ્તુશ‍ૃઙ્ગારઃ ।
ઈહામૃગસ્તુ કાર્યઃ સુસમાહિતકાવ્યબન્ધશ્ચ ॥ ૮૦॥

યદ્વ્યાયોગે કાર્યં યે પુરુષા વૃત્તયો રસાશ્ચૈવ ।
ઈહામૃગેઽપિ તે સ્યુઃ કેવલમમરસ્ત્રિયા યોગઃ ॥ ૮૧॥

યત્ર તુ વધેપ્સિતાનાં વધો હ્યુદગ્રો ભવેદ્ધિ પુરુષાણામ્ ।
કિઞ્ચિદ્વ્યાજં કૃત્વા તેષાં યુદ્ધં શમયિતવ્યમ્ ॥ ૮૨॥

ઈહામૃગસ્ય લક્ષણમુક્તં વિપ્રાઃ સમાસયોગેન ।
ડિમલક્ષણં તુ ભૂયો લક્ષણયુક્ત્યા પ્રવક્ષ્યામિ ॥ ૮૩॥

પ્રખ્યાતવસ્તુવિષયઃ પ્રખ્યાતોદાત્તનાયકશ્ચૈવ ।
ષડ્રસલક્ષણયુક્તશ્ચતુરઙ્કો વૈ ડિમઃ કાર્યઃ ॥ ૮૪॥

શ‍ૃઙ્ગારહાસ્યવર્જં શેષૈઃ સર્વૈ રસૈઃ સમાયુક્તઃ ।
દીપ્તરસકાવ્યયોનિર્નાનાભાવોપસમ્પન્નઃ ॥ ૮૫॥

નિર્ઘાતોલ્કાપાતૈરુપરાગેણેન્દુસૂર્યયોર્યુક્તઃ ।
યુદ્ધનિયુદ્ધાધર્ષણસમ્ફેટકૃતશ્ચ કર્તવ્યઃ ॥ ૮૬॥

માયેન્દ્રજાલબહુલો બહુપુસ્તોત્થાનયોગયુક્તશ્ચ ।
દેવભુજગેન્દ્રરાક્ષસયક્ષપિશાચાવકીર્ણશ્ચ ॥ ૮૭॥

ષોડશનાયકબહુલઃ સાત્વત્ત્યારભટીવૃત્તિસમ્પન્નઃ ।
કાર્યો ડિમઃ પ્રયત્નાન્નાનાશ્રયભાવસમ્પન્નઃ ॥ ૮૮॥

ડિમલક્ષણમિત્યુક્તં મયા સમાસેન લક્ષણાનુગતમ્ ।
વ્યાયોગસ્ય તુ લક્ષણમતઃ પરં સમ્પ્રવક્ષ્યામિ ॥ ૮૯॥

વ્યાયોગસ્તુ વિધિજ્ઞૈઃ કાર્યઃ પ્રખ્યાતનાયકશરીરઃ ।
અલ્પસ્ત્રીજનયુક્તસ્ત્વેકાહકૃતસ્તથા ચૈવ ॥ ૯૦॥

બહવશ્ચ તત્ર પુરુષા વ્યાયચ્છન્તે યથા સમવકારે ।
ન ચ દિવ્યનાયકયુક્તઃ કાર્યસ્ત્વેકાઙ્ક એવાયમ્ ॥ ૯૧॥

ન ચ દિવ્યનાયકકૃતઃ કાર્યો રાજર્ષિનાયકનિબદ્ધઃ ।

યુદ્ધનિયુદ્ધાધર્ષણસંઘર્ષકૃતશ્ચ કર્તવ્યઃ ॥ ૯૨॥

એવંવિધસ્તુ કાર્યો વ્યાયોગો દીપ્તકાવ્યરસયોનિઃ ।
વક્ષ્યામ્યતઃ પરમહં લક્ષણમુત્સૃષ્ટાઙ્કસ્ય ॥ ૯૩॥

પ્રખ્યાતવસ્તુવિષયસ્ત્વપ્રખ્યાતઃ કદાચિદેવ સ્યાત્ ।
દિવ્યપુરુષૈર્વિયુક્તઃ શેષૈર્યુક્તો ભવેત્પુંભિઃ ॥ ૯૪॥

કરુણરસપ્રાયકૃતો નિવૃત્તયુદ્ધોદ્યતપ્રહારશ્ચ ।
સ્ત્રીપરિદેવિતબહુલો નિર્વેદિતભાષિતશ્ચૈવ ॥ ૯૫॥

નાનાવ્યાકુલચેષ્ટઃ સાત્વત્ત્યારભટિકૈશિકીહીનઃ ।
કાર્યઃ કાવ્યવિધિજ્ઞૈઃ સતતં હ્યુત્સૃષ્ટિકાઙ્કસ્તુ ॥ ૯૬॥

યદ્દિવ્યનાયકકૃતં કાવ્યં સંગ્રામબન્ધવધયુક્તમ્ ।
તદ્ભારતે તુ વર્ષે કર્તવ્યં કાવ્યબન્ધેષુ ॥ ૯૭॥

કસ્માદ્ભારતમિષ્ટં વર્ષેષ્વન્યેષુ દેવવિહિતેષુ ।
હૃદ્યા સર્વા ભૂમિઃ શુભગન્ધા કાઞ્ચની યસ્માત્ ॥ ૯૮॥

ઉપવનગમનક્રીડા વિહારનારીરતિપ્રમોદાઃ સ્યુઃ ।
તેષુ હિ વર્ષેષુ સદા ન તત્ર દુઃખં ન વા શોકઃ ॥ ૯૯॥

યે તેષામધિવાસાઃ પુરાણવાદેષુ પર્વતાઃ પ્રોક્તાઃ ।
સમ્ભોગસ્તેષુ ભવેત્કર્મારમ્ભો ભવેદસ્મિન્ ॥ ૧૦૦॥

પ્રહસનમપિ વિજ્ઞેયં દ્વિવિધં શુદ્ધં તથા સઙ્કીર્ણમ્ ।
અઙ્કસ્ય લક્ષણમિદં વ્યાખ્યાતમશેષયોગમાત્રગતમ્ ॥ ૧૦૧॥

પ્રહસનમતઃ પરં સલક્ષણં સમ્પ્રવક્ષ્યામિ ।
વક્ષ્યામિ તયોર્યુક્ત્યા પૃથગ્પૃથગ્લક્ષણવિશેષમ્ ॥ ૧૦૨॥

ભગવત્તાપસવિપ્રૈરન્યૈરપિ હાસ્યવાદસમ્બદ્ધમ્ ।
કાપુરુષસમ્પ્રયુક્તં પરિહાસાભાષણપ્રાયમ્ ॥ ૧૦૩॥

અવિકૃતભાષાચારં વિશેષભાવોપપન્નચરિતપદમ્ ।
નિયતગતિવસ્તુવિષયં શુદ્ધં જ્ઞેયં પ્રહસનં તુ ॥ ૧૦૪॥

વેશ્યાચેટનપુંસકવિટધૂર્તા બન્ધકી ચ યત્ર સ્યુઃ ।
અનિભૃતવેષપરિચ્છદચેષ્ટિતકરણૈસ્તુ સંકીર્ણમ્ ॥ ૧૦૫॥

લોકોપચારયુક્તા યા વાર્તા યશ્ચ દમ્ભસંયોગઃ ।
સ પ્રહસને પ્રયોજ્યો ધૂર્તપ્રવિવાદસમ્પન્નઃ ॥ ૧૦૬॥

વીથ્યઙ્ગૈઃ સંયુક્તં કર્તવ્યં પ્રહસનં યથાયોગ્યમ્ ।
ભાણસ્યાપિ તુ લક્ષણમતઃ પરં સમ્પ્રવક્ષ્યામિ ॥ ૧૦૭॥

આત્માનુભૂતશંસી પરસંશ્રયવર્ણનાવિશેષસ્તુ ।
વિવિધાશ્રયો હિ ભાણો વિજ્ઞેયસ્ત્વેકહાર્યશ્ચ ॥ ૧૦૮॥

પરવચનમાત્મસંસ્થં પ્રતિવચનૈરુત્તમોત્તમગ્રથિતૈઃ ।
આકાશપુરુષકથિતૈરઙ્ગવિકારૈરભિનયૈશ્ચૈવ ॥ ૧૦૯॥

ધૂર્તવિટસમ્પ્રયોજ્યો નાનાવસ્થાન્તરાત્મકશ્ચૈવ ।
એકાઙ્કો બહુચેષ્ટઃ સતતં કાર્યો બુધૈર્ભાણઃ ॥ ૧૧૦॥

ભાણસ્યાપિ હિ નિખિલં લક્ષણમુક્તં તથાગમાનુગતમ્ ।
વીથ્યાઃ સમ્પ્રતિ નિખિલં કથયામિ યથાક્રમં વિપ્રાઃ ॥ ૧૧૧॥

સર્વરસલક્ષણાઢ્યા યુક્તા હ્યઙ્ગૈસ્ત્રયોદશભિઃ ।
વીથી સ્યાદેકાઙ્કા તથૈકહાર્યા દ્વિહાર્યા વા ॥ ૧૧૨॥

અધમોત્તમમધ્યાભિર્યુક્તા સ્યાત્પ્રકૃતિભિસ્તિસૃભિઃ ।
ઉદ્ઘાત્યકાવલગિતાવસ્પન્દિતનાલ્યસત્પ્રલાપાશ્ચ ॥ ૧૧૩॥

વાક્કેલ્યથ પ્રપઞ્ચો મૃદવાધિબલે છલં ત્રિગતમ્ ।
વ્યાહારો ગણ્ડશ્ચ ત્રયોદશાઙ્ગાન્યુદાહૃતાન્યસ્યાઃ ॥ ૧૧૪॥

અથ વીથી સમ્પ્રોક્તા લક્ષણમેષાં પ્રવક્ષ્યામિ ।
પદાનિ ત્વગતાર્થાનિ યે નરાઃ પુનરાદરાત્ ॥ ૧૧૫॥

યોજયન્તિ પદૈરન્યૈસ્તદુદ્ઘાત્યકમુચ્યતે ।
યત્રાન્યસ્મિન્ સમાવેશ્ય કાર્યમન્યત્પ્રસાધ્યતે ॥ ૧૧૬॥

તચ્ચાવલગિતં નામ વિજ્ઞેયં નાટ્યયોક્તૃભિઃ ।
આક્ષિપ્તેઽર્થે તુ કસ્મિઁશ્ચિચ્છુભાશુભસમુત્થિતે ॥ ૧૧૭॥

કૌશલાદુચ્યતેઽન્યોઽર્થસ્તદવસ્પન્દિતં ભવેત્ ।
હાસ્યેનોપગતાર્થપ્રહેલિકા નાલિકેતિ વિજ્ઞેયા ॥ ૧૧૮॥

મૂર્ખજનસન્નિકર્ષે હિતમપિ યત્ર પ્રભાષતે વિદ્વાન્ ।
ન ચ ગૃહ્યતેઽસ્ય વચનં વિજ્ઞેયોઽસત્પ્રલાપોઽસૌ ॥ ૧૧૯॥

એકદ્વિપ્રતિવચના વાક્કેલી સ્યાત્પ્રયોગેઽસ્મિન્ ।
યદસદ્ભૂતં વચનં સંસ્તવયુક્તં દ્વયોઃ પરસ્પરં યત્તુ ॥ ૧૨૦॥

એકસ્ય ચાર્થહેતોઃ સ હાસ્યજનનઃ પ્રપઞ્ચઃ સ્યાત્ ।
યત્કારણાદ્ ગુણાનાં દોષીકરણં ભવેદ્વિવાદકૃતમ્ ॥ ૧૨૧॥

દોષગુણીકરણં વા તન્મૃદવં નામ વિજ્ઞેયમ્ ।
પરવચનમાત્મનશ્ચોત્તરોત્તરસમુદ્ભવં દ્વયોર્યત્ર ॥ ૧૨૨॥

અન્યોન્યાર્થવિશેષકમધિબલમિતિ તદ્ બુધૈર્જ્ઞેયમ્ ।
અન્યાર્થમેવ વાક્યં છલમભિસન્ધાનહાસ્યરોષકરમ્ ॥ ૧૨૩॥

શ્રુતિસારૂપ્યાદ્યસ્મિન્ બહવોઽર્થા યુક્તિભિર્નિયુજ્યન્તે ।
યદ્ધાસ્યમહાસ્યં વા તત્ત્રિગતં નામ વિજ્ઞેયમ્ ॥ ૧૨૪॥

પ્રત્યક્ષવૃત્તિરુક્તો વ્યાહારો હાસ્યલેશાર્થઃ ।
સંરમ્ભસંભ્રમયુતં વિવાદયુક્તં તથાપવાદકૃતમ્ ॥ ૧૨૫॥

બહુવચનાક્ષેપકૃતં ગણ્ડં પ્રવદન્તિ તત્ત્વજ્ઞાઃ ।
ઇતિ દશરૂપવિધાનં સર્વં પ્રોક્તં મયા હિ લક્ષણતઃ ।
પુનરસ્ય શરીરગતં સન્ધિવિધૌ લક્ષણં વક્ષ્યે ॥ ૧૨૬॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે દશરૂપનિરૂપણં
નામાષ્ટાદશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 18*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*